CAREERS360

PREPARATION Series

# UK Board Class 10

# Sanskrit

## Sample Paper 2024-25

प्रतिदर्श-प्रश्नपत्रम्

2024-2025

कक्षा-10

संस्कृतम् (028)

पूर्णांक : 80

(1) अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

(2) उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि ।

(3) प्रत्येक खण्डम् अधिकृत्य उत्तराणि क्रमेण एकस्मिन् स्थाने एव लेखनीयानि।

(4) प्रश्नपत्रे उत्तराणि न लेखनीयानि ।

(5) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

(6) खण्डसंख्या अपि लेखनीया।

**खण्ड- 'क' (अपठितांश अवबोधनम्)**

1. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत-

उत्तराखण्डे समये-समये अनेके महापुरुषाः अभवन्। तेषु पं० गोविन्दवल्लभ पन्त महोदयः अग्रणीयः अस्ति। सः प्रख्यातः राजनीतिज्ञः, कुशलवक्ता, संसदीयप्रथायाः मर्मज्ञश्च आसीत्। सः १८८७ तमे खीष्टाब्दे सितम्बर मासस्य दशमे दिनाङ्के अल्मोड़ा जनपदस्य खूँट ग्रामे जन्म अलभत्। प्रारम्भिकी शिक्षा अल्मोड़ानगरे प्राप्य सः उच्चशिक्षार्थ प्रयागनगरम् अगच्छत्। आंग्लशासकानां विरुद्धः सः 'कुमाऊँ परिषद्' संस्थायाः स्थापनाम् अकरोत्।

(क) एकपदेन उत्तरं लिखत- 1×2=2

(i) उत्तराखण्डे समये समये के अभवन्?

(ii) पन्त महाभागस्य प्रारम्भिकी शिक्षा कुत्र अभवत् ?

(ख). पूर्णवाक्येन उत्तरत- 1

(i)आंग्लशासकानां विरुद्धः सः कस्याः स्थापनाम् अकरोत् ?

(ग). निर्देशानुसारम् उत्तरत- 1×2=2

(i) प्रख्यातः राजनीतिज्ञः' अत्र विशेषण पदं किम् ?

(ii) 'सः उच्चशिक्षार्थं प्रयागनगरम् अगच्छत्।' अत्र क्रियापदं किम् ?

2. अधोलिखितम् अनुच्छेदं पठित्वा अनुच्छेदाधारितान् प्रश्नान् उत्तरत-

कस्मिंश्चित् अधिष्ठाने चत्वारो जनाः परस्परं मित्रत्वम् आपन्नाः वसन्ति स्म। बालभावे तेषां मतिः अजायत- 'भोः! देशान्तरं गत्वा विद्यायाः उपार्जनं करणीयम्। अथ अन्यस्मिन् दिवसे सर्वे जनाः परस्परं निश्चयं कृत्वा विद्योपार्जनाय कान्यकुब्जं (कन्नौज) गताः तत्र च विद्यामठं गत्वा पठन्ति। एवं द्वादशवर्षाणि यावदेकचित्ततया पठित्वा विद्याकुशलास्ते सर्वे सञ्जाताः। ततः तैः चतुर्भिः मिलित्वा उक्तम् - 'वयं सर्वविद्यापारङ्गताः' तदुपाध्यायस्य अनुमतिं प्राप्य स्वदेशं गच्छामः। गुर्वदेशं प्राप्य सर्वे स्वदेशं प्रति गताः, यद्यपि विद्यापारङ्गतास्ते तथापि लोकव्यवहाराणां ज्ञानाभावात् हास्यपात्राः जाताः। अतः जीवने व्यवहारज्ञानं नूनमावश्यकम् वर्तते, व्यावहारिकज्ञा- नाभावे केवलं शास्त्रज्ञानं हास्यास्पदं भवति

(क) एकपदेन उत्तरत- 1×2=2

(i) विद्यापारङ्गताः ते कुत्र गन्तुम् इच्छन्ति?

(ii) जीवने कीदृशं ज्ञानम् आवश्यकं भवति ?

(ख) पूर्णवाक्येन उत्तरत- 1×2=2

(i) चत्वारो जनाः किमर्थं देशान्तरं गन्तुम् इच्छन्ति?

(ii) जनाः कान्यकुब्जे कति वर्षाणि यावत् अधीतवन्तः?

(ग) निर्देशानुसारम् उत्तरत- 1×2=2

(i) 'सर्वे ते हास्यतां यान्ति' अत्र किं क्रियापदम् ?

(ii) 'शास्त्रज्ञानं हास्यकारणमेव भवति' अत्र किं विशेष्यपदम्?

(घ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं लिखत- 1

**खण्ड - 'ख' (रचनात्मकं लेखनम्)**

3. भवान् चिन्तामणिः। भवतां विद्यालये भाषण-प्रतियोगिता आयोजिता। तद्विषये स्वमित्रं मोहनः प्रति लिखितं पत्रं मञ्जूषायां प्रदत्तैः पदैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत-

-

**मञ्जूषा- प्रधानाचार्यः, कुशलं, भाषणप्रतियोगिता, मया।** 1×4=4

परीक्षाभवनम्

तिथिः 09-10-2024

प्रियमित्र मोहन,

सप्रेम नमस्ते।

अत्र (i) .............तत्रास्तु। गते सप्ताहे अस्माकं विद्यालये (ii) ..............आयोजिता। अस्यां प्रतियोगितायां (iii) ...............प्रथमं स्थानं प्राप्तम्। विद्यालयस्य (iv)................ छात्रान् प्राशंसत् तेभ्यः पुरस्कारान् अयच्छत्। पितृभ्यां मम प्रणामाः।

भवतः अभिन्नमित्रम्

चिन्तामणि

4. मञ्जूषातः शब्दचयनं कृत्वा निम्नांकितं संवादं पूरयित्वा लिखत - 1×4=4

| मञ्जूषा - धार्मिक, गमिष्यसि, मया, कैचीधामं |
|---|

पंकजः - सखि! ग्रीष्मावकाशे त्वं कुत्र ..........

मनीषा - ग्रीष्मावकाशे अहम् ..........गमिष्यामि।

पंकजः - कैचीधामं.......... क्षेत्रम् अस्ति।

मनीषा - आम! त्वमपि ..........सह चल।

5. '**अस्माकं प्रदेशः**' इति विषयम् अधिकृत्य निम्नांकितशब्दसूचीतः शब्दान् चित्वा चत्वारि वाक्यानि लिखत- 2×4=8

**शब्दसूची-देहरादूनम्, त्रयोदश , शोभते, अत्र, प्रवहति, ब्रह्म कमलम्**

## खण्ड - 'ग' (अनुप्रयुक्त व्याकरणम्)

6. अधोलिखितेषु रेखांकितपदेषु सन्धिं / सन्धि विच्छेदं कृत्वा उत्तरपुस्तिकायां लिखत- 1×3=3

(क) आर्यस्य वन्दनायां लव **इत्यात्मानं** श्रावयामि।

(ख) वने **सिंहः +अपि** ।

(ग) सः **मुनिः+गच्छति** ।

7. रेखांकितपदानां समासं विग्रहं वा प्रदत्त विकल्पेभ्यः चित्वा लिखत। 1×3=3

(क) **शरीरे स्थितः** शरीरविनाशाय ।

(अ) शरीरस्थितः (ब) स्थितः शरीरं (स) शरीर स्थं (द) शरीरस्थितं

(ख) **व्याघ्रचित्रकौ** अपि नदीजलं पातुमागतौ ।

(अ) चित्रकः च व्याघ्रःच (ब) व्याघ्रःच चित्रकः च (स) व्याघ्रं च चित्रकं च (द) व्याघ्रे च चित्रके च

(ग) **रामस्य समीपम्** उपसृत्य प्रणम्य च।

(अ) रामःसमीपे (ब) उपग्रामम् (स) उपरामम् (द) उपरामेण

8. अधोलिखित-रेखांकितपदानां प्रकृति-प्रत्यय-संयोजनं उचित विकल्पेन चित्वा लिखत। 1×3=3

(क) **गम्+शतृ** जलं न पिबेत् ।

(अ) गमशतृ (ब) गच्छन् (स) गच्छामि (द) गच्छति

(ख) **बुद्धि+मतुप्** नारी सर्वदा पूजनीया ।

(अ) बुद्धिमान (ब) बुद्धिवान (स) बुद्धिमती (द) बुद्धिमतुप्

(ग) सा समाजस्य **सेवक+टाप्** अस्ति।

(अ) सेवक (ब) सेविका (स) सेवकटाप् (द) सेवीका

9. मञ्जूषायाः सहायतया निम्नलिखितानि वाक्यानि अव्ययशब्दैः पूरयित्वा लिखत- 1×3=3

**मञ्जूषा- कुतः, अपि, उच्चैः।**

(क) त्वम् .................संस्कृतं वद।

(ख) अधुना त्वं ........ आगच्छसि।

(ग)  वने सिंहः..................गर्जति।

10. अधोलिखितानां वाक्यानां वाच्यपरिवर्तनं कृत्वा उत्तरपुस्तिकायां लिखत- 1×3=3

(क)  मोहनः विद्यालयं गच्छति।

(ख)  त्वया रामायणं पठ्यते।

(ग)  सः पत्रं लिखति ।

11. घटिकां दृष्ट्वा संस्कृत पदेषु समयं पूरयित्वा वाक्यानि उत्तरपुस्तिकायां लिखत- 1×4=4

(क)



प्रातः9:30 बजे

(ख)



सायम् 3:45 बजे

(ग)



सायम् 5:15 बजे

(घ)



रात्रिः 8:00 बजे

(क) ज्योतिः ......................वादने विद्यालयं गच्छति।

(ख) सा .............................वादने विद्यालयात् आगच्छति ।

(ग) सा ......................................वादने जलपानं करोति।

(घ) .......................................वादने ज्योति पाठं पठति।

12. अधोलिखितयोः वाक्ययोः अङ्कानां स्थाने प्रदत्त विकल्पेभ्यः चित्वा लिखत। 1x2=2

(क)  अस्माकं विद्यालये **(15)** भवनानि सन्ति।

 (अ) पञ्चदश (ब) षोडश (स) पंचवटी (द) पञ्चविंशति

(ख)  मम ग्रामे **(83)** कृषकाः सन्ति।

 (अ) अष्टात्रिंशत् (ब) अष्टादश (स) एकाशीतिः (द) त्र्यशीतिः

13. अधोलिखितेषु वाक्येषु रेखांकितानि पदानि शुद्धानि कृत्वा पूर्णवाक्यं उत्तरपुस्तिकायां लिखत - 1×3=3

(क) **<u>मम</u>** विद्यालयं परितः पुष्पाणि विकसन्ति।

(ख) **<u>सः</u>** कमला अस्ति।

(ग) अहं श्वः विद्यालयं **<u>अगच्छम्</u>** ।

**खण्ड 'घ' (पठित अवबोधनम्)**

14. अधोलिखितं गद्यांशं पठित्वा तत् आधारितान् प्रश्नान् उत्तरत -

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान्। तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः। तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नःसमभूत्। एकदा सः पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत्। पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। 'निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा', एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः। करुणापरो गृही तस्मै आश्रयं प्रायच्छत्।

(क) एकपदेन उत्तरत - 1

 (i) कः वित्तम् उपार्जितवान्?

(ख) पूर्णवाक्येन उत्तरत - 1x2=2

(i) निर्धनः जनः किं उपार्जितवान्?

(ii) पिता केन कारणेन व्याकुलः जातः?

(ग) निर्देशानुसारम् उत्तरत- 1x2=2

(i) विजने प्रदेशे' इत्यत्र विशेषणपदं किम् ?

(ii) पुत्रशब्दस्य पर्यायं चित्वा लिखत ।

15. अधोलिखितं श्लोकं पठित्वा प्रश्नान् उत्तरत-

क्रोधो हि शत्रुः प्रथमो नराणां, देहस्थितो देहविनाशनाय ।
यथास्थितः काष्ठगतो हि वह्निः स एव वह्निर्दहते शरीरम् ॥

(क) एकपदेन उत्तरत - 1

(i) केषां प्रथमः शत्रुः क्रोधः वर्तते?

(ख) पूर्णवाक्येन उत्तरत - 1x2=2

(i) काष्ठगतः वह्निः किं करोति ?

(ii) क्रोधः किं दहते?

(ग) निर्देशानुसारम् उत्तरत- 1x2=2

(i) 'काष्ठगतः वह्निः' इत्यनयोः पदयोः किं विशेष्यपदम् ?

(ii) 'अग्निः' इति पदस्य समानार्थकपदं श्लोकात् चित्वा लिखत ।

16. अधोलिखितं नाट्यांशं पठित्वा प्रश्नान् उत्तरत -

रामः -अहमत्र भवतोः जनकं नामतो वेदितुमिच्छामि।

लवः -न हि जानाम्यस्य नामधेयम्। न कश्चिदस्मिन् तपोवने तस्य नाम व्यवहरति।

रामः -अहो माहात्म्यम्।

कुशः -जानाम्यहं तस्य नामधेयम्।

रामः -कथ्यताम्।

कुशः-निरनुक्रोशो नाम.... ..

रामः-वयस्य, अपूर्व खलु नामधेयम्।

विदूषकः -(विचिन्त्य) एवं तावत् पृच्छामि। निरनुक्रोश इति क एवं भणति ?

कुशः -अम्बा।

विदूषकः -किं कुपिता एवं भणति, उत प्रकृतिस्था?

कुशः- यद्यावयोर्बालभावजनितं किञ्चिदविनयं पश्यति तदा एवम् अधिक्षिपति निरनुक्रोशस्य पुत्रौ, मा चापलम् इति।

विदूषकः-एतयोर्यदि पितुर्निरनुक्रोश इति नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता एतेन वचनेन दारकौ निर्भर्त्सयति।

रामः -(स्वगतम्) धिङ मामेवंभूतम्। सा तपस्विनी मत्कृतेनापराधेन स्वापत्यमेवं मन्युगर्भैरक्षरैर्निर्भर्त्सयति

(क) एकपदेन उत्तरत - 1

(i) लवकुशयोः जनके नामतः कः वेदितुम् इच्छति ?

(ii) अवमानिता जननी कौ निर्भर्त्सयति ?

(ख) पूर्णवाक्येन उत्तरत - 1x2=2

(i) यदा माता कुशलवयोः बालभावजनितम् अविनयं पश्यति, तदा सा कथम् अधिक्षिपति ?

(ii) कुशलवयोः कीदृशी जननी दारकौ निर्भर्त्सयति ?

(ग) निर्देशानुसारम् उत्तरत- 1x2=2

(i) 'बालभावजनितम् अविनयम्' अनयोः किं विशेषणपदम्?

(ii) 'सा तपस्विनी' अत्र 'सा' इति सर्वनामपदं कस्यै प्रयुक्तम् ?

17. अधोलिखितयोः श्लोकयोः भावार्थं उपयुक्तपदैः पूरयित्वा उत्तरपुस्तिकायां लिखत -

(क) अमन्त्रमक्षरं नास्ति, नास्ति मूलमनौषधम् ।
अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः ॥ 1/2x4=2

भावार्थः-अस्मिन् संसारे.....अक्षरं न अस्ति,.......मूलं न अस्ति, अयोग्यः.......न अस्ति, तेषां गुणानुसारं ..........दुर्लभः अस्ति।

(ख) सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥ 1/2x4=2

भावार्थः- फलछायापरिपूर्णः ........ सर्वदा सेवनीयः भवति।........ दैववशात्.........न आयान्ति चेत। .........तु अवश्यमेव भविष्यति ।

18. अधोलिखितयोः श्लोकयोः अन्वयं पूरयित्वा उत्तरपुस्तिकायां लिखत-

(क) ददाति प्रतिगृह्णाति, गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ॥ 1/2x2=1

अन्वयः - ददाति प्रतिगृह्णाति...........आख्याति पृच्छति भुङ्क्ते भोजयते च एव.............प्रीतिलक्षणम्।

(ख) त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधीः॥ 1/2x2=1

अन्वयः- यः धर्मप्रदाम् वाचम् त्यक्त्वा......(वाचम्) अभ्युदीरयेत् (सः) विमूढधीः पक्वं फलं परित्यज्य.........(फलं) भुङ्क्ते।

19. रेखाङ्कितपदमाधृत्य प्रश्ननिर्माणं कृत्वा उत्तरपुस्तिकायां लिखत - 1/2x4=2

क) उद्याने **<u>पक्षिणां</u>** कलरवं चेतः प्रसादयति।

(ख) बुद्धिमती **<u>चपेटया</u>** पुत्रौ प्रहृतवती।

(ग) अयम् **<u>अन्येभ्यो</u>** दुर्बलः।

(घ) **<u>एतादृशी</u>** भयावहघटना गढवालक्षेत्रे घटिता।

20. अधोलिखितानि वाक्यानि घटनाक्रमेण संयोज्य पुनः उत्तरपुस्तिकायां लिखत- 1/2x6=3

(i) तदैव एकः वानरः आगत्य तस्य पुच्छ धुनाति।

(ii) वनस्य दृश्यं समीपे एवैका नदी वहति।

(iii) परं वानरस्तु कूर्दित्वा वृक्षमारूढः।

(iv) तदैव अन्यस्मात् वृक्षात् अपरः वानरः सिंहस्य कर्णमाकृष्य पुनः वृक्षोपरि आरोहति।

(v) कुद्धः सिंहः तं प्रहर्तुमिच्छति ।

(vi) एकः सिंहः सुखेन विश्राम्यति ।।

21. निम्नांकित शब्दानां संस्कृतेन वाक्यप्रयोगं कुरुत- 1x2=2

(क) ज्ञानेन

(ख) उत्तराखंडस्य